GRAND ACADEMIC PORTAL
RESEARCH JOURNALS

GAP भाषा
A MULTILINGUAL JOURNAL OF RESEARCH
( ISSN – 2582-8770 )
Globally peer-reviewed and open access journal.

ज्ञान: अध्ययन: परम्परा

# अथर्ववेदे विश्वपर्यावरणसंरक्षणाय वैदिकोपायाः

**डॉ. प्रदीपसेमवालः**

हरि ओम एन्क्लेव, बन्जारावाला
देहरादून
अणुवाक् semwalpradeep2@gmail.com
दूरभाषा– 812609250

विश्वेऽस्मिन् जनाः भौतिकविकासे प्रगतिशीलाः वर्तन्ते। जनाः स्वविकासे अस्माकं पर्यावरणस्य विषये जागरूकाः नैव दृश्यन्ते। आधुनिककाले विज्ञानस्य प्रगतेः कारणात् नूतनाविष्काराणां कारणात् नगरीकरणात् च पर्यावरणं प्रदूषितं जायमानं वर्तते। सम्प्रति जनसंख्यावृद्धिकारणात् वनानाम् अनावश्यककर्तनात् वातावरणं मलिनं भवति। सर्वत्र दृष्टिं प्रसारयामः चेत् कुत्रचित् भूमिः मलिना दृश्यते। जनैः अजागरूकतया अवकरं यत्र–तत्र क्षिप्यते। नानाविधेभ्यः उद्योगयन्त्रेभ्यः वाहनेभ्यः निर्गतः धूमः प्राणवायुं विनाशयति। नदीषु मलिनं जलम् अवशिष्टपदार्थानां क्षेपणेन तत्रत्यं जलं पातुं योग्यं न वर्तते। एवं पर्यावरणं प्रति अजागरूकता पर्यावरणस्य स्वरूपं विकृतं करोति। यदि एवं प्रकारेण प्रदूषणं वर्धमानः भविष्यति चेत् निकटे भविष्यति काले प्राणिनां जीवनं कष्टकरं भविष्यति। विश्वपर्यावरणस्य समस्यां निवारयितुं सम्पूर्णविश्वस्य वैज्ञानिकाः प्रयत्नशीलाः सन्ति। पर्यावरणस्य संरक्षणाय अस्माकम् ऋषयः जागरूकाः आसन्। वैदेषु पर्यावरणसंरक्षणाय अनेकाः उपायाः सन्ति। वेदेषु सम्पूर्णब्रह्माण्डस्य स्वरूपं वर्णितं वर्तते। अस्माकं परितः प्रकृतिः भूमिजलवायुरग्न्याकाशरूपेण विद्यते। एतानि एव तत्वानि अस्माकं शरीरे अपि सन्ति। कथितं वर्तते यत् – यत् पिण्डे तद् ब्रह्माण्डे। तत्रमानवाः पशवः पक्षिणः अन्ये च जीवा अपि सम्मिलिताः भवति। एतेषां सम्मिलितरूपमेव पर्यावरणं वर्तते अर्थात् परितः आवरणं पर्यावरणम्। यदि एषु घटकेषु एकोऽपि घटकः नष्टः असुरक्षितश्च भविष्यति चेत् पर्यावरणम् असंतुलितं भविष्यति।

यदि वयं स्वस्थाः सुरक्षिताः रोगरहिताश्च भवितुमिच्छामश्चेत् तदर्थम् अस्माकं पर्यावरणम् अस्मान् उपकरोति। यदि पर्यावरणं स्वच्छं स्थास्यति चेत् अस्माकं जीवनमपि आनन्दितं भविष्यति। सम्प्रति दृश्यते यत् आविश्वे अस्माकं पर्यावरणम् अत्यधिकं दूषितं जायमानं वर्तते। भूमिप्रदूषणं वायुप्रदूषणं जलप्रदूषणं चेतादृशानि अनेकानि प्रदूषणस्य प्रकाराणि सन्ति। यैः शारीरिकाः मानसिकाश्च रोगाः संजायन्ते।

अस्माकं भारतीयसंस्कृतौ ऋग्–यजु–सामार्थवादिषु वेदेषु पर्यावरणस्य अत्यधिकं महत्वं कथितं वर्तते। वेदाः ज्ञानस्य राशयः सन्ति। एतेषु पर्यावरणस्य मूलभूतस्रोताः वर्णिताः सन्ति। अथर्ववेदे भूमिवनस्पतिपशुपक्षीसम्बन्धीनां विश्वपर्यावरणसंरक्षणाय वेदेषु वृक्षाणां वनस्पतीनां पर्वतानां नदीनां पशूणां पक्षीणां च पूजनस्य विधानं वर्तते। एते देवतारूपेण ऋषिभिः पूजिताः सन्ति। यदा अस्माभिः एषां पूजनं विधीयते तदा एतान् प्रति समपर्णभावः श्रद्धा च भवति। अस्यां परिस्थितौ वयम् एतान् प्रति कदापि अनाचारं कर्तुं न शक्नुमः। तदा वयं एतेषां पूजनाय स्वच्छवातारणस्य चिन्तनं कुर्मः। यज्ञकाले ऋषयः सर्वप्रथमम् आत्मशुद्धिं कुर्वन्ति स्म। यतो हि शुद्धतां विना कार्यसिद्धिः न भवतीति तेषामभिमतम् अद्यत्वेऽपि स्वीक्रियते। ते सर्वत्र सर्वदा च प्रकृतिं पूजयन्ति स्म अतः सर्वदा ते स्वच्छपर्यावरणस्य चिन्तकाः आसन्।

स्वच्छे वातावरणे पर्यावरणं स्वच्छं सन्तुलितं च भवति। एतान् प्रति कृतं दोषं पापं जनयति इति धारणा वर्तते। एतेषां पूजनेन पापक्षयं भवति। पापमोचनसूक्ते ऋषिः प्रार्थयते यत् हे अग्ने, औषधे, वनस्पते, इन्द्र बृहस्पते सूर्य वयं भवतां समेषां स्तुतिं कुर्मः। अस्मान् पापान्मोचयन्तु इति। यथोक्तम्–

**अग्निं ब्रूमो वनस्पतीनोषधीरुत वीरुधः।**
**इन्द्रं बृहस्पतिं सूर्यं ते नो मुंचन्त्वंहसः।।**[1]

अथर्ववेदस्य प्राणसूक्ते जलं वायु इत्यादयः प्राणत्वेन घोषिताः सन्ति। भूतभविष्यत्वर्तमानादिषु कालेषु प्राणवायुः मातरिश्वा कथितं वर्तते। सः एव प्राणः वर्षारूपेण पृथिव्यां वर्षति। यथा –

**प्राणमाहुर्मातरिश्वानं वातो ह प्राण उच्यते।**
**प्राणे ह भव्यं च प्राणे सर्वं प्रतिष्ठितम्।।**[2]
**यदा प्राणो अभ्यवर्षीद् वर्षेण पृथिवीं महीम्।**
**ओषधयः प्र जायन्तेऽथो याः काश्च वीरुधः।।**[3]

वायुः यदा शुद्धः भवति तदा अस्माकं स्वाथ्यं समुचितं भवति। स्वच्छः वायुः हृदयस्य कृते औषधरूपेण कार्यं करोति। अस्वच्छवायौ जीवनस्य कल्पना व्यर्था एव। यतो हि अस्वच्छे वायौ शरीरं रुग्णतां प्राप्य क्षीणं भवति। पक्षिणः अपि शुद्धे वायौ डयमानाः पर्यावरणसंरक्षणे स्वसहयोगं कल्पयन्ति। अथर्ववेदस्य पुष्टिकर्मसूक्ते नद्यः वायुश्च समुचितरूपेण प्रवहेयुः इति कामना कृता वर्तते। यथा –

---

[1] अथर्व.11 / 8 / 1
[2] अथर्व.11 / 6 / 15
[3] अथर्व.11 / 6 / 17

https://www.gapbhasha.org/

GAP भाषा
A MULTILINGUAL JOURNAL OF RESEARCH
( ISSN – 2582-8770 )
Globally peer-reviewed and open access journal.

**सं सं स्रवन्तु सिन्धवः सं वाताः सं पतत्रिणः।**
**इमं यज्ञं प्रदिवो मे जुषन्तां संस्राव्येण हविषा जुहोमि।।**[4]

वेदेषु वायुः न केवलं देवतारूपेण अपितु जीवनाय आवश्यकपदार्थानां प्रदातारूपेणापि स्तुतः वर्तते। अयम् अन्तरिक्षस्य स्वामी भूत्वा अपि पृथिव्याम् अन्नस्य प्रजायाः पशूनां च रक्षणं करोति। अयमेव पुष्टिदायकेन धन–धान्येन अस्मान् पोषयति–

**त्वं नो नभसस्पत ऊर्जं गृहेषु धारय।**
**आ पुष्टमेत्वा वसु।**[5]

वायोः शुद्धिं कर्तुं विविधवृक्षाणां लतानां पुष्पाणां रोपणं पूजनं च वेदेषु निर्दिष्टं वर्तते। वृक्षाः कार्बनडाइआक्साइड स्वीकृत्य अस्मान् आक्सीजनस्वरूपं प्राणवायुं प्रयच्छन्ति। भगवान् कृष्णः गीतायाम् आत्मानम् –

**अश्वत्थः सर्ववृक्षाणाम्।।**[6]

इति कथयति। अन्ये वृक्षाः केवलं दिवसकाले एव ऑक्सीजन प्रयच्छन्ति किन्तु अश्वथवृक्षः तु आदिनम् आरात्रिः च ऑक्सीजन प्रयच्छति। एतदतिरिक्तम् औदुम्बरः ब्रह्मणः प्रतीकः वटवृक्षश्च शिवस्य स्वरूपं मन्यते। श्रीमद्भागवतमहापुराणे भगवान् श्रीकृष्णः वृक्षाणां महत्वं ग्वालान् सम्बोधयन् कथयति – मम प्रियमित्राणि! एते वृक्षाः भाग्यवन्तः सन्ति। एषां सम्पूर्णं जीवनं परोपकाराय एव वर्तते। एते स्वयं झंझावातं वृष्टिम् आतपं सहन्ते अस्मान् च तेभ्यः रक्षन्ति। अहं कथयामि एषामेव जीवनं श्रेष्ठं वर्तते। एभ्यः एव सर्वे प्राणिनः आधारं प्राप्नुवन्ति। तेषां पोषणं भवति। यथा कस्यचित् सज्जनपुरुषस्य गृहात् कोऽपि याचकः रिक्तहस्तः नैव प्रत्यागच्छति तथैव वृक्षेभ्यः अपि किममि प्राप्यते एव। एते स्वपत्रं फलं पुष्पं छायां मूलं त्वक् काष्ठं गन्धं भस्म अङ्गारं कलिका च प्रदाय अन्येषाम् इच्छां पूरयन्ति। यथा –

**पश्येतान् महाभागान् परार्थैकान्तजीवितान्।**
**वातवर्षातपहिमान् सहन्तो वारयन्ति नः।।**
**अहो एषां वरं जन्म सर्वप्राण्युपजीवनम्।**
**सुजनस्येव येषां वै विमुखा यान्ति नार्थिनः।।**
**पत्रपुष्पफलच्छायामूलवल्कलदारुभिः।**
**गन्धनिर्यासभस्मास्थितोक्मैः कामान् वितन्वते।।**[7]

शास्त्रेषु वनस्पतिहिंसा निषिद्धा वर्तते। **विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुम् असाम्प्रतम्**[8] इति अस्माकं पूर्वजैः सघोषम् उक्तमस्ति। **पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत्**[9] एतादृशीं सूक्तिं वयं यदि जीवने अवतारयामः चेत् वृक्षच्छेदनं न भविष्यति। तेन पर्यावरणं सन्तुलितं स्वच्छं च स्थास्यति।

अथर्ववेदस्य पृथ्वीसूक्ते सर्वे प्राणिनः मातुः भूमेः सन्ततिरूपेण कथिता सन्ति। अस्य सूक्तस्य मन्त्रेषु भूमेः विशेषतानां तां प्रति कर्तव्यानां बोधः कारितं वर्तते। कर्तव्यपालपनाय आवश्यकगुणानां प्रवृत्तीनां मर्यादानापि उल्लेखो वर्तते। भूमिसूक्तं वसुधैवकुटुम्बकम् इति भावं दृढीकरोति। भारतीययज्ञपद्धतिः वेदानामनुसरणं कृत्वा पर्यावरणसंरक्षणे साहाय्यं करोति। यस्यां भूमौ यज्ञाः भवन्ति तस्यां भूमौ प्राणिनः श्रेष्ठेन अन्नेन जलेन च जीवनं धरन्ति सा भूमि अस्मान् प्राणान् आयुश्च प्रददाति। तत्रत्य वातावरणं शुद्धं पवित्रं च भवति यथा–

**भूम्यां देवेभ्यो ददति यज्ञं हव्यमरंकृतम्।**
**भूम्यां मनुष्या जीवन्ति स्वधयान्नेन मर्त्याः।**
**सा नो भूमिः प्राणमायुर्दधातु जरदष्टिं मा पृथिवी कृणोतु।।**[10]

तत्रैव अन्यस्मिन् मन्त्रे पृथिवी मातारूपेण कथिता वर्तते। यथा– **माता भूमिः पुत्रोऽहं पृथिव्याः**[11]**।** अस्माकं मनस्सु यदि एषा भावना परिपक्वा भविष्यति चेत् अस्माभिः कदापि पर्यावरणस्य भूमिभागस्य दूषणं नैव कर्तुं शक्यते। भूमौ सागर–महासागर–नदी–तडाग–कूपादि जलसाधनानि अन्नफलशाकौषधयः नानाविधानि तत्वानि च विद्यमानानि भवन्ति तानि सर्वेषां प्राणिनां कृते उपयोगीनि कल्याणप्रदानि ऐश्वर्यप्रदायकानि च सन्ति। तानि तदैव उपयुक्तानि भविष्यन्ति यदा भूमिः प्रदूषणरहिता भविष्यति। यथा –

**यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवः।**
**यस्यामिदं जिन्वति प्राणदेजत् सा नो भूमिः पूर्वपेये दधातु।।**[12]

---

[4] अथर्व.1 / 15 / 1 http://vedicreserve.miu.edu/atharva_veda/atharva_veda.pdf
[5] अथर्व. / 6 / 79 / 1
[6] श्रीमद्भगवद्गीता। 10 / 26
[7] श्रीमद्भागवतमहापुराणम् 10 / 23 / 32.33.34
[8] कुमारसम्भवम् 2 / 55
[9] विदुरनीतिः। 2 / 18
[10] अथर्व.12 / 1 / 22
[11] अथर्व.12 / 1 / 12
[12] अथर्व.12 / 1 / 3

https://www.gapbhasha.org/

पृथिवी पितेव अस्मान् रक्षति पुष्णाति च। यथा पिता अस्माभिः सह सद्व्यवहारं करोति तथैव इयमपि अस्माभिः सह सम्यक् व्यवहारं करोति। ऋषिः पृथिव्याः प्रार्थनां कुर्वन् कथयति यत् भवती अस्माकं कृते शुद्धं वायुं प्रवाहयतु। यथोक्तम्–

**पितेव पुत्रानभि सं स्वजस्व नः शिवा नो वाता इह वान्तु भूमौ।**
**यमोदनं पचतो देवते इह तन्नस्तप उत सत्यं च वेत्तु।।**[13]

पितृमेधसूक्ते पृथिवी नानाविधवस्तूनां कोशरूपा कथिता वर्तते। या मङ्गलकार्येभ्यः धर्मम् अर्थं कामं मोक्षं च जनयति। ऋषयः भगवन्तम् अग्निं समाजाय तृप्तिप्रदायकं बलप्रदायकं च अखण्डनीयम् अन्नम् अदितिं च रक्षितुं प्रार्थयन्ति। यथोक्तम्–

**कोशं दुहन्ति कलशं चतुर्बिलमिडां धेनुं मधुमतीं स्वस्तये।**
**ऊर्जं मदन्तीमदितिं जनेष्वग्ने मा हिंसीः परमे व्योमन्**[14]

पर्यावरणस्य महत्वपूर्णं घटकं वर्तते जलम्। ऋषिः प्रार्थयते– यज्जलं सुवर्णमिव आलोकितेन रंगेन सम्पन्नं अत्यधिकं मनोहरं शुद्धताप्रदायकमस्ति यस्मात् सवितृदेवः अग्निदेवश्च उत्पन्नौ। यत् श्रेष्ठवर्णाधायकं जलम् अग्निगर्भभूतमस्ति तज्जलम् अस्माकं व्याधीः अपाकृत्य अस्मभ्यं सुखं शान्तिं च प्रदद्यात्। यथा–

**हिरण्यवर्णाः शुचयः पावका यासु जातः सविता यास्वग्निः।**
**या अग्निं गर्भं दधिरे सुवर्णास्ता न आपः शं स्योना भवन्तु।।**[15]

यथा वायुं विना जीवनं सम्भवं नास्ति तथैव जलं विना अपि जीवनं न सम्भवति। **जलमेव जीवनम्।** जलेनैव कृषिकार्यं पानं स्नानं वस्त्रप्रक्षालनं भवति। अद्यत्वे जलप्रदूषणस्य समस्या प्रबला वर्तते। वेदेषु जलस्य स्वच्छतायै महत्वं प्रदत्तं वर्तते। स्वर्गोदनसूक्ते प्रतिपादितं यत् जलधाराः पवित्रकर्मणा एव शुद्धाः भवन्ति। शुद्धाः जलधाराः एव द्युलोकं पृथिवीं लोकं च प्राप्नुवन्ति। एताः जलधाराः जीवनदायिन्यः, सर्वेषाम् आधारभूताः च सन्ति। अत्रैव एतदपि प्रतिपादितं यत् जलम् आकाशात् पतति पुनश्च वाष्पीभूय अन्तरिक्षमेव प्रविशति। इदमेव जलं सर्वान् पावयति। अतः पृथिव्याः पर्यावरणसंरक्षणाय च जलस्य शुद्धता आवश्यकी भवति। यथोक्तम्–

**पूताः पवित्रैः पवन्ते अभ्राद् दिवं च यन्ति पृथिवां च लोकान्।**
**ता जीवला जीवधन्या प्रतिष्ठाः पात्र आसिक्ताः पर्यग्निरिन्धाम्।।**[16]
**आ यन्ति दिवः पृथिवीं सचन्ते भूम्याः सचन्ते अध्यन्तरिक्षम्।**
**शुद्धाः सतीस्ता उ शुम्भन्त एव ता नः स्वर्गमभि लोकं नयन्तु।।**

इतोऽपि ऋषयः अस्माकं शुद्धतायै शुद्धजलाय च मातृभूमिं प्रार्थयन्ति। भूमिसूक्ते यथोक्तम् –

**शुद्धा न आपस्तन्वे क्षरन्तु यो नः सेदुरप्रिये तं नि दध्मः।**
**पवित्रेण पृथिवि मोत् पुनामि।।**[17]

जलं न केवलं स्नानाय प्रक्षालनाय चैव आवश्यकम् अपितु एतत् व्याधीनां निवारणाय अपि आवश्यकम्। अपांभेषजसूक्ते उक्तं यत् वयं व्याधिनिवारकस्य दिव्यगुणयुतः जलस्य आवाहनं कुर्मः। एतत् जलं सुखप्रदायकं समृद्धिकारकं च वर्तते। वस्तुतः एतत् औषधिस्वरूपमेव। यथा–

**ईशानां वार्याणां क्षयन्तीश्चर्षणीनाम्। अपो याचामि भेषजम्।**[18]

पर्यावरणसंरक्षणाय भगवतः सूर्यस्य रश्मयः अस्मान् उपकुर्वन्ति। यदा सूर्योदयो भवति तदा प्राणिनः नवचेतनां प्राप्नुवन्ति तथैव प्रकृतिरपि नूतनस्वरूपं प्रकटयति नदीनां जलं प्रातः निर्मलं भवति। वनस्पतयः विकासं प्राप्नुवन्ति नूतनानि पुष्पाणि विकसन्ति। शीतलः मन्दः वायुः प्रवहति। सूर्यस्य ऊष्मया मेघाः संजायन्ते। ये समुचितवर्षया भूमिम् आप्लावयन्ति।

तदा विविधानाम् औषधीनां वनस्पतीनां च उत्पत्तिः जायते यैः जीवनं पुष्टं भवति। सूर्यरश्मीनां सम्पर्केण जलं पवित्रं भवति। अथर्ववेदस्य अपांभेषजसूक्ते यथा –

---
[13] अथर्व.12/3/12
[14] अथर्व.18/4/30
[15] अथर्व.1/33/1
[16] अथर्व.12/3/25–26
[17] अथर्व.12/1/30
[18] अथर्व.1/5/4

https://www.gapbhasha.org/

GAP भाषा
A MULTILINGUAL JOURNAL OF RESEARCH
( ISSN – 2582-8770 )
Globally peer-reviewed and open access journal.

**अमूर्या उप सूर्ये याभिर्वा सूर्यः सह ।**
**ता नो हिन्वन्त्वध्वरम्।**[19]

सूर्यः जगतः आत्मा कथितं वर्तते। ऋषयः कल्याणकारिणीनाम् औषधीनां जलस्य कृते पर्यावरणस्य सन्तुलनाय च सवितृदेवं स्तुवन्ति। अपांभेषज्यसूक्ते यथा –

**देवस्य सवितुः सवे कर्म कृण्वन्तु मानुषाः।**
**शं नो भवन्त्वप ओषधीः शिवा।।**[20]

शान्तिसूक्ते प्रार्थना कृता वर्तते यत् पृथिवी अन्तरिक्षं द्युलोकः जलं औषधयः वनस्पतयः समस्तदेवाः च अस्माकं कृते शान्तिप्रदाः भवेयुः। शान्त्याः अपि असीमशान्तेः प्राप्तिः भवतु। एताभिः शान्तिप्रक्रियाभिः वयं घोरकर्म क्रूरकर्म पापपूर्णफलं च दूरम् अपसारयामः। ते शान्ताः भूत्वा कल्याणप्रदाः भवेयुः। ते सर्वे अस्माकं कृते मङ्गलप्रदाः भवेयुः। यथोक्तम्–

**पृथिवी शान्तिरन्तरिक्षं शान्तिर्द्यौः शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः**
**शान्तिर्विश्वे मे देवाः शान्तिः सर्वे मे देवाः शान्तिः शान्तिः शान्तिः शान्तिभिः।**
**ताभिः शान्तिभिः सर्वशान्तिभिः शमयामोऽहं यदिह घोरं यदिह क्रूरं**
**यदिह पापं तच्छान्तं तच्छिवं सर्वमेव शमस्तु नः।।**[21]

पर्यावरणसंरक्षणे प्रधाना भूमिका मानवानामेव भवति। मानवैः एव पृथिव्याः सन्तुलनाय पर्यावरणस्य संरक्षा कर्तव्या। एतेन न केवलं पर्यावरणस्य सन्तुलनमेव सिध्यति अपितु स्वयं मानवस्यापि हितं सुरक्षितं भवति। अस्माकं विश्वे जायमानानां पर्यावरणविसंगतीनां कारणात् मानवजीवनं संकटग्रस्तं जायमानमस्ति। एतत् केवलं पर्यावरणसंरक्षणोपायानां द्वारा एव निवारयितुं शक्यते। भारतीयपरम्परायाः ध्येयसूत्रं सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग् भवेत् इत्येतस्य संकल्पना तदैव चरितार्था भविष्यति यदा अस्माकं पर्यावरणं सुरक्षितं च भविष्यति।
।।इति।।

[19] अथर्व. 1/4/2
[20] अथर्व. 6/23/3
[21] अथर्व.19/9/14

https://www.gapbhasha.org/